# Shri Lakshmi Kavacham

# શ્રીલક્ષ્મીકવચમ્

## Document Information

Text title : laxmI kavacham 4

File name : laxmikavacham2.itx

Category : kavacha, devii, lakShmI, devI

Location : doc_devii

Proofread by : NA

Description-comments : brahmavaivartapurANa 3 Ganapati Khanda, adhyAya 38, verses 52-82

Latest update : March 31, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 22, 2022

*sanskritdocuments.org*

# શ્રીલક્ષ્મીકવચમ્

નારાયણ ઉવાચ ।
શ્ૃણુ વિપ્રેન્દ્ર પદ્માયાઃ કવચં પરમં શુભમ્ ।
પદ્મનાભેન યદ્દત્તં બ્રહ્મણે નાભિપદ્મકે ॥ ૧॥

સમ્પ્રાપ્ય કવચં બ્રહ્મા તત્પદ્મે સસૃજે જગત્ ।
પદ્માલયાપ્રસાદેન સલક્ષ્મીકો બભૂવ સઃ ॥ ૨॥

પદ્માલયાવરં પ્રાપ્ય પાદ્મશ્ચ જગતાં પ્રભુઃ ।
પાદ્મેન પદ્મકલ્પે ચ કવચં પરમાદ્ભુતમ્ ॥ ૩॥

દત્તં સનત્કુમારાય પ્રિયપુત્રાય ધીમતે ।
કુમારેણ ચ યદ્દત્તં પુષ્કરાય ચ નારદ ॥ ૪॥

યદ્ધૃત્વા પાઠનાદ્ બ્રહ્મા સર્વસિદ્ધેશ્વરો મહાન્ ।
પરમૈશ્વર્યસંયુક્તઃ સર્વસમ્પત્સમન્વિતઃ ॥ ૫॥

યદ્ધૃત્વા ચ ધનાધ્યક્ષઃ કુબેરશ્ચ ધનાધિપઃ ।
સ્વાયમ્ભુવો મનુઃ શ્રીમાન્પઠનાદ્ધારણાદ્યતઃ ॥ ૬॥

પ્રિયવ્રતોત્તાનપાદૌ લક્ષ્મીવન્તૌ યતો મુને ।
પૃથુઃ પૃથ્વીપતિઃ સદ્યો હ્યભવદ્ધારણાદ્યતઃ ॥ ૭॥

કવચસ્ય પ્રસાદેન સ્વયં દક્ષઃ પ્રજાપતિઃ ।
ધર્મશ્ચ કર્મણાં સાક્ષી પાતા યસ્ય પ્રસાદતઃ ॥ ૮॥

યદ્ધૃત્વા દક્ષિણે બાહૌ વિષ્ણુઃ ક્ષીરોદશાયિતઃ ।
ભક્ત્યા વિધત્તે કણ્ઠે ચ શેષો નારાયણાંશકઃ ॥ ૯॥

યદ્ધૃત્વા વામનં લેભે કશ્યપશ્ચ પ્રજાપતિઃ ।
સર્વદેવાધિપઃ શ્રીમાન્મહેન્દ્રો ધારણાદ્યતઃ ॥ ૧૦॥

રાજા મરુતો ભગવાનભવદ્ધારણાદ્યતઃ ।

ત્રૈલોક્યાધિપતિઃ શ્રીમાન્નહુષો યસ્ય ધારણાત્ ॥ ૧૧॥

વિશ્વં વિજિગ્યે ખટ્વાઙ્ગઃ પઠનાદ્ધારણાદ્યતઃ ।
મુચુકુન્દો યતઃ શ્રીમાન્માન્ધાતૃતનયો મહાન્ ॥ ૧૨॥

સર્વસમ્પત્પ્રદસ્યાસ્ય કવચસ્ય પ્રજાપતિઃ ।
ઋષિશ્છન્દશ્ચ બૃહતી દેવી પદ્માલયા સ્વયમ્ ॥ ૧૩॥

ધર્માર્થકામમોક્ષેષુ વિનિયોગઃ પ્રકીર્તિતઃ ।
પુણ્યબીજં ચ મહતાં કવચં પરમાદ્ભુતમ્ ॥ ૧૪॥

ૐ હ્રીં કમલવાસિન્યૈ સ્વાહા મે પાતુ મસ્તકમ્ ।
શ્રીં મે પાતુ કપાલં ચ લોચને શ્રીં શ્રિયૈ નમઃ । ૧૫॥ ।

ૐ શ્રીં શ્રિયૈ સ્વાહેતિ ચ કર્ણયુગ્મં સદાઽવતુ ।
ૐ શ્રીં ક્લીં મહાલક્ષ્મ્યૈ સ્વાહા મે પાતુ નાસિકામ ॥ ૧૬॥

ૐ શ્રીં પદ્માલયાયૈ ચ સ્વાહા દન્તાન્સદાઽવતુ ।
ૐ શ્રીં કૃષ્ણપ્રિયાયૈ ચ દન્તરન્ધ્રં સદાઽવતુ ॥ ૧૭॥

ૐ શ્રીં નારાયણેશાયૈ મમ કણ્ઠં સદાઽવતુ ।
ૐ શ્રીં કેશવકાન્તાયૈ મમ સ્કન્ધં સદાઽવતુ .. .. ૧૮॥

ૐ શ્રીં પદ્મનિવાસિન્યૈ સ્વાહા નાભિં સદાઽવતુ ।
ૐ હ્રીં શ્રીં સંસારમાત્રે મમ વક્ષઃ સદાઽવતુ ॥ ૧૯॥

ઓં શ્રીં મોં કૃષ્ણકાન્તાયૈ સ્વાહા પૃષ્ઠં સદાઽવતુ ।
ઓં હ્રીં શ્રીં શ્રિયૈ સ્વાહા ચ મમ હસ્તૌ સદાઽવતુ ॥ ૨૦॥

ૐ શ્રીનિવાસકાન્તાયૈ મમ પદૌ સદાઽવતુ ।
ૐ હ્રીં શ્રીં ક્લીં શ્રિયૈ સ્વાહા સર્વાઙ્ગં મે સદાઽવતુ ॥ ૨૧॥

પ્રાચ્યાં પાતુ મહાલક્ષ્મીરાગ્નેય્યાં કમલાલયા ।
પદ્મા માં દક્ષિણે પાતુ નૈરૃત્યાં શ્રીર્હરિપ્રિયા ॥ ૨૨॥

પદ્માલયા પશ્ચિમે માં વાયવ્યાં પાતુ સા સ્વયમ્ ।
ઉત્તરે કમલા પાતુ ચૈશાન્યાં સિન્ધુકન્યકા ॥ ૨૩॥

નારાયણી ચ પાતૂર્ધ્વમધો વિષ્ણુપ્રિયાઽવતુ ।
સન્તતં સર્વતઃ પાતુ વિષ્ણુપ્રાણાધિકા મમ ॥ ૨૪॥

ઇતિ તે કથિતં વત્સ સર્વમન્ત્રૌઘવિગ્રહમ્ ।
સર્વૈશ્વર્યપ્રદં નામ કવચં પરમાદ્ભુતમ્ ॥ ૨૫॥

સુવર્ણપર્વતં દત્વા મેરુતુલ્યં દ્વિજાતયે ।
યત્ફલં લભતે ધર્મી કવચેન તતોઽધિકમ્ ॥ ૨૬॥

ગુરુમભ્યર્ચ્ય વિધિવત્કવચં ધારયેત્તુ યઃ ।
કણ્ઠે વા દક્ષિણે બાહૌ સ શ્રીમાન્પ્રતિજન્મનિ ॥ ૨૭॥

અસ્તિ લક્ષ્મીર્ગૃહે તસ્ય નિશ્ચલા શતપૂરુષમ્ ।
દેવેન્દ્રૈશ્ચાસુરેન્દ્રૈશ્ચ સોઽવધ્યો નિશ્ચિતં ભવેત્ ॥ ૨૮॥

સ સર્વપુણ્યવાન્ધીમાન્સર્વયજ્ઞેષુ દીક્ષિતઃ ।
સ સ્નાતઃ સર્વતીર્થેષુ યસ્યેદં કવચં ગલે ॥ ૨૯॥

યસ્મૈ કસ્મૈ ન દાતવ્યં લોભમોહભયૈરપિ ।
ગુરુભક્તાય શિષ્યાય શરણ્યાય પ્રકાશયેત્ ॥ ૩૦॥

ઇદં કવચમજ્ઞાત્વા જપેલ્લક્ષ્મીં જગત્પ્રસૂમ્ ।
કોટિસઙ્ખ્યં પ્રજપ્તોઽપિ ન મન્ત્રઃ સિદ્ધિદાયકઃ ॥ ૩૧॥

ઇતિ શ્રીબ્રહ્મવૈવર્તે મહાપુરાણે તૃતીયે ગણપતિખણ્ડે નારદનારાયણસંવાદે
શ્રીલક્ષ્મીકવચવર્ણનં નામાષ્ટાત્રિંશત્તમોઽધ્યાયઃ ॥ ૩૮॥

Brahmavaqivartapurana 3 Ganapati Khanda, adhyAya 38, Verses 52-82

---

*Shri Lakshmi Kavacham*

pdf was typeset on January 22, 2022

Please send corrections to *sanskrit@cheerful.com*